International Journal of Applied Research 2020; 6(8): 55-57




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2020; 6(8): 55-57
www.allresearchjournal.com
Received: 14-06-2020
Accepted: 18-07-2020

**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

# याज्ञवल्क्यदृष्ट्या व्यवहारस्य महत्त्वम्

**रतीश कुमार मिश्र**

**प्रस्तावना:**
अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः। तच्च दुष्टनिचग्रह–मन्तरेण न सम्भवति। दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण सम्भवति। तद्व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तम्–

'व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहम्'[1]।

स च व्यवहारः कीदृशः, कतिविधः, कथं चेतीतिकर्तव्यताकलापो नाभिहितः, तदभिधानाय प्रारभ्यते–

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः[2]।।

अन्यविरोधेन स्वात्मसम्बन्धितया कथनं व्यवहारः। यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति। तस्यानेकविधत्वं दर्शयति बहुवचनेन। नृप इति न क्षत्रियमात्रस्यायं धर्मः किंतु प्रजापालनाधिकत– स्यान्यस्यापीति दर्शयति। पश्येदिति पूर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः। विद्वद्भिर्वेदव्याकरणादिधर्मशास्त्राभिज्ञैः। ब्राह्मणैर्न क्षत्रियादिभिः। 'ब्राह्मणैः सह' इति तृतीयानिर्देशादेषामप्राधान्यम्। 'सहयुक्तेऽप्रधाने'[3] इति स्मरणात्। अतश्चादर्शनेऽन्यथादर्शने वा राज्ञो दोषो न ब्राह्मणानाम्। यथाह–

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति[4]।।

इति कथम् धर्मशास्त्रानुसारेण, नार्थशास्त्रानुसारेण। देशादिसमयधर्मस्यापि धर्मशास्त्रविरुद्धस्य धर्मशास्त्रविषयत्वान्न पृथगुपादानम्। तथा च वक्ष्यति–

निजधर्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः[5]।। इति।

क्रोधलोभविवर्जित इति। 'धर्मशास्त्रानुसारेण' इति सिद्धे 'क्रोधलोभ–विवर्जितः' इति वचनमादरार्थम्। क्रोधोऽमर्षः। लोभो लिप्सातिशयः।।

सभ्यांश्चाह–

श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः[6]।।

किञ्च, श्रुताध्ययनसंपन्नाः श्रुतेन मीमांसाव्याकरणादिश्रवणेन अध्ययनेन च वेदाध्ययनेन संपन्नाः, धर्मज्ञाः धर्मशस्त्रज्ञाः, सत्यवादिनः सत्यवचनशीलाः, रिपौ मित्रे च ये समाः रागद्वेषादिरहिताः, एवंभूताः सभासदः सभायां संसदि यथा सीदन्त्युपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्तव्याः। यद्यपि 'श्रुताध्ययन–सम्पन्नाः' इतयविशेषेणोक्तं, तथापि ब्रह्मणा एव। यथाह–

स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः।
धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः[7]।। इति।

ते च त्रयः कर्तव्याः, बहुवचनस्यार्थवत्त्वात् 'यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः'[8] इति मनुस्मरणाच्च। वृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह–

लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृषी सभा[9]।। इति।

न च 'ब्राह्मणै सह' इति पूर्वश्लोकोक्तानां ब्राह्मणानां 'श्रुताध्ययनसम्पनाः' इत्यादि विशेषणमिति मन्तव्यम्; तृतीयाप्रथमान्तनिर्दिष्टानां विशेषणविशेष्य–भावासम्भवात्, 'विद्वद्भिः' इत्यनेन पुनरुक्तिप्रसत्रच्च। तथा च कात्यायनेन ब्राह्मणानां सभासदां च स्पष्टं भेदो दर्शितः–

सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः[10]।। इति।

तत्र ब्राह्मणा अनियुक्ताः, सभासदस्तु नियुक्ता इति भेदः। अत एवोक्तम्– 'नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हति' इति। तत्र नियुक्तानां यथा– वस्थितार्थकथनेऽपि यदि राजऽन्यथा करोति तदाऽसौ निवारणीयः, अन्यथा दोषः। उक्तञ्च–

अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः[11]।। इति।

अनियुक्तानां पुनरन्यथाभिधानेऽनभिधाने वा दोषो नतु राज्ञोऽनिवारणे–

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम्।
अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी[12]।। इति।

'रिपौ मित्रे च' इति चकाराल्लोकञ्जनार्थं कतिपयैर्वणिग्भिरप्यधिष्टितं सदः कर्तव्यम्। यथाह–

कुलशीलवयोवृत्तवित्तवद्भिमत्सरैः।
वणिग्भिः स्यात्कतिपयैः कुलभूतैरतिष्ठितम्[13]।। इति।

'व्यवहारान्नृपः पश्येत्' इत्युक्तं, तत्रानुकल्पमाह–

अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्[14]।।

कार्यान्तव्याकुलतया व्यवहारानपश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् सर्वान्धर्मशास्त्रोक्तान्सामयिकांश्च धर्मान्वेत्ति विचारयतीति सर्वधर्मवित् ब्राह्मणो न क्षत्रियादिर्नियोक्तव्यो व्यवहारदर्शने। तं च कात्यायनोक्तगुणविशिष्टं कुर्यात्। यथाह–

दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम्।
परम भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम्[15]।। इति।

एवंभूत ब्राह्मणासम्भवे क्षत्रियं वैश्यं वा नियुञ्जीत, न शूद्रम्। यथाह–

ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत्।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्[16]।। इति।
नारदेन त्वयमेव मुख्यो दर्शितः–
धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमातिः पश्येद्व्यहारानानुक्रमात्[17]।। इति।

प्राड्ववाकमते स्थितो न स्वमते स्थितः। राजा चारचक्षुषा परसैन्यं पश्यतीतिवत्। तस्य चेयं यौगिकी संज्ञा। अर्थिप्रतयर्थिनौ पृच्छतीति प्राट्, तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैः सह विविनक्ति विवेचयति वेति विवाकः, प्राट् चासौ विवाकश्च प्राड्विवाकः। उक्तं च–

विवादानुगतं पृष्ट्वा ससभ्यस्तत्प्रयत्नतः।
विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः[18]।। इति।

प्राड्विवाकादयः सभ्या यदि रागादिना स्मृत्यपेतं व्यवहारं विचारयन्ति तदा राज्ञा किं कर्तव्यमित्यत आह–

रागाल्लोभादीयाद्वाऽपि स्मृत्यपेतादिकारिणः।
सभ्याः पृथ्क्पृथग्दण्ड्या विवादाद्द्विगुणं दमम्[19]।।

अपि च, पूर्वोक्ताः सभ्या रजसो निरौशत्वेन तदभिभूता रागात्स्नेहाति– शयाल्लोभाल्लिप्सातिशयाद्भयात्संत्रासात्स्मृत्यपेतं स्मृतिविरुद्धं, 'आदि' शब्दादाचारापेतं कुर्वन्तः पृथक्पृथगेकैकशो विवादाद्विवादपराजयनिमित्तद्दमाद्द्विगुणदमं दण्ड्याः, न पुनर्विवादास्पदीभूताद्द्रव्यात्। तथा सति स्त्रीसंग्रहणादिषु दण्डाभावप्रसत्र। रागलोभभयानामुपादानं रागादिष्वेव द्विगुणो दमो नाज्ञानमोहादिविषयति नियमार्थम्।। नच 'राजा सर्वस्येष्टे ब्राह्मणवर्जम्'[20] इति गौतमवचनान्न ब्राह्मणा दण्ड्या इति मन्तव्यम्; तस्य प्रशंसाथत्वात्।। यत्तु 'षड्भिः परिहार्यो राज्ञाऽवध्यश्चाबन्ध्य–श्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्च'[21] इति, तदपि 'स एष बहुश्रुतो भवति लोकवेदवेदात्रविद्वाकोवाक्येतिहासपुराणकुशल– स्तदपेक्षस्तद्वृत्तिश्चाष्टत्वारिंशत्– संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत'[22] इति, प्रतिपादितबहुश्रुतविषयं, न ब्राह्मणमात्रविषयम्।।
व्यवहारविषयमाह–

स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्[23]।।

धर्मशास्त्रासमायाचारविरुद्धेन मार्गेण परैराधर्षितोऽभिभूता यद्राज्ञे प्राड्विवाकाय वा आवेदयति विज्ञापयति चेद्यदि, तदावेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारस्तस्य पदं विषयः। तस्य चेदं सामान्यलक्षणम्। स च द्विविधः– शौाभियोगस्तत्त्वाभियोगश्चेति। यथाह–

अभियोगस्तु विज्ञेयः शौातत्त्वाभियोगतः।
शौाऽसतां तु संसर्गातत्त्वं होढाभिदर्शनात्[24]।। इति।

होढा लोप्त्रं, लित्रमिति यावत्। तेन दर्शनं, साक्षाद्वा दर्शनं होढाभिदर्शनं तस्मात्। तत्त्वाभियोगौपि द्विविधः– प्रतिषेधात्मको विध्यात्मकश्चेति। यथा– 'मत्तो हिरण्यादिकं गृहीत्वा न प्रयच्छति', 'क्षेत्रादिकं ममायमपहरति' इति च। उक्तं च कात्यायनेन–'न्याय्यं स्वं नेच्छते कर्तुमन्याय्यं वा करोति यः'[25] इति। स पुनश्चाष्टादशधा भिद्यते। यथाह–

तेषामाद्यमृणादानं निक्षेपौस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च।।
वेतनस्यैव चाऽऽदानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः।।
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च।।
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह[26]।। इति।।

एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि। यथाह–

एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं भवेत्।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते[27]।। इति।।

'आवेदयति चेद्राज्ञे' इत्यनेन स्वयमेवागत्यावेदयति, न राजप्रेरितस्तत्पुरुषप्रेरितो वेति दर्शयति। यथाह–

नोत्पादयेत्स्वयं कार्यं राजा वाप्यस्य पूरुषः।
नच प्रापितमन्येन ग्रसेतार्थं कथंचन[28]।। इति।।

परैरिति परेण पराभ्यां परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति।। यत्पुनः–

एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च।
अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः।।

इति नारद (कात्यायन ?) वचनम्, तद्भिनसाध्यद्वयविषयम्। 'आवेदयति चेद्राज्ञे' इतयनेनैव राज्ञा पृष्टो विनीतवेष आवेदयेत्। आवेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानमकल्पादीनां चानाहृवानमित्याद्यर्थसिद्धमिति नोक्तम्। स्मृत्यन्तरे तु स्पष्टार्थमुक्तम्। यथा–

काले कार्यार्थिनं पृच्छेद्गृणन्तं पुरतः स्थितम्।
किं कार्यं का च ते पीडा मा भैषीब्रूहि मानव।।
केन कस्मिन्कदा कस्मात्पृच्छेदेवं सभागतम्।
एवं पृष्ठं स यद्ब्रूयात्स सभ्यैर्ब्राह्मणेः सह।।
विमृश्य कार्यं नयाय्यं चेदाह्णानार्थमतः परम्।
मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत्।।
अकल्पबालस्थविरविषमस्थक्रियाकुलान्।
कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान्।
मत्तोन्मत्तप्रमत्तार्तान्भृत्यान्नाह्वनयेन्नृपः।।
न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम्।
सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः।।
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः।
निष्कुला याश्च पतितास्तासामाह्वानमिष्यते।।
कालं देशं च विज्ञाय कार्याणां च बलाबले।
अकल्पादीनपि शनैर्यानैराह्वानयेन्नृपः।।
ज्ञात्वाभियोगं येऽपि स्युर्वने प्रव्रजितादयः।
तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्[29]।। इति।

आसेधव्यवस्थाप्यर्थसिद्धैव–

वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम्।।
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा।
चतुर्विधः स्यादासेधो नासिद्धस्तं विलङ्घयेत्।।
आसेधकाल आसिद्ध आसेधं योऽतिवर्तते।
स विनेयोऽन्यथाकुर्वन्नासेद्धा दडभाग्भवेत्।।
नदीसन्तारकान्तारदुर्देशोपप्लवादिषु।
आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात्।।
निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः।
अभियुक्तस्तथाऽन्येन राजकार्योद्यतस्तथा।।
गवां प्रचारे गोपालाः सत्यावापे कृषीवलाः।
शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे[30]।। इति।

आसेधो राजाज्ञयाऽवरोधः। अकल्पादयः पुत्राादिकमन्यं वा सुहृदं प्रेषयेयुः, नच ते परार्थवादिनः–

यो न भ्राता नच पिता न पुत्रो न नियोगकृत्।
परार्थवादी दण्ड्यः स्याद्व्यवहारेषु विब्रुवन्[31]।।

प्रत्यर्थिनि मुद्रालेख्यपुरुषामन्यतमेनानीते किं कुर्यादित्यत आह–

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना।
समामासतदर्धाहर्नामजात्यादिचिहि्नतम्[32]।।

**सन्दर्भ ग्रंथ सूची :**


1. याज्ञवल्क्यस्मृति (आ0) 360
2. याज्ञ0 स्मृ0– 2.1
3. पा0– 2.3.19
4. मनु0– 8.128
5. याज्ञ0 स्मृ0 (व्य0)– 186
6. आचार्य कात्यायनः
7. मनु0– 8.11
8. मनु0 – 1.11
9. आचार्य कात्यायनः
10. आचार्य कात्यायनः
11. मनु0 – 8.13
12. आचार्य कात्यायनः
13. याज्ञ0 स्मृ0 (व्य0)–1
14. याज्ञ0 स्मृ0– 2.3
15. आचार्य कात्यायनः
16. आचार्य कात्यायनः
17. नारदस्मृतिः
18. नारदस्मृतिः
19. याज्ञ0 स्मृ0– 2.4
20. गौ0– 11.1
21. गौ0– 8.12–13
22. गौ0– 8.4–11
23. याज्ञ0स्मृ0– 2.5
24. नारदस्मृति– 1.27
25. आचार्य कात्यायनः
26. मनु0– 8.4–7
27. नारदस्मृतिः– 1.20
28. मनु0–8.43
29. मिताक्षरा0– 2.5
30. नारद0– 1.47–53
31. नारदस्मृतिः– 2.23
32. याज्ञ0 स्मृ0– 2.6